# दशम: पाठ: समय:

## अभ्यासः

1. अधोलिखितवाक्येषु उदाहरणानुसारं समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत।

उदाहरणम्- द्वितलीयरेलवाहनं **सपाददशवादने** (10:15) जयपुरं प्राप्नोति।
द्वितलीयरेलवाहनं **सपाददशवादने** जयपुरं प्राप्नोति।

(i) पुरुषोत्तम-एक्सप्रेस इति रेलयानं **सार्धनव** (9:30) वादने पुरीतः प्रस्थानं करोति।
(ii) चेतक-एक्सप्रेस इति रेलयानं **पादोनपञ्च** (4:45) वादने दिल्लीम् आगच्छति।
(iii) हावड़ा-एक्सप्रेस **एकादश** (11:00) वादने हावड़ास्थानकं प्राप्नोति।
(iv) रेलयानमेकं **सपादअष्टवादने** (8:15) उत्तराञ्चलं प्रति गच्छति।

2. अघोलिखितवाक्येषु उदाहरणानुसारं समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत-
**उदाहरणम्**- माता प्रातः **पञ्च** (5:00) वादने उत्तिष्ठति।
माता प्रातः **पञ्चवादने** उत्तिष्ठति।

(i) राहुलः प्रातर्भ्रमणाय **सपादषड्** (6:15) वादने उद्यानं गच्छति।
(ii) मल्लिका **सार्धसप्त** (7:30) वादने प्रातराशं करोति।
(iii) अनन्या **पादोनषड्** (5:45) वादने क्रीडति।
(iv) सर्वे **दश** (10:00) वादने शयनं कुर्वन्ति।

3. अधोलिखितवाक्येषु समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत-
**उदाहरणम्**-प्रातः **सप्त** (7:00) वादनतः पादोनअष्ट (7:45 ) वादनपर्यन्तं विद्यालये प्रार्थनासभा भवति।
प्रातः **सप्तवादनतः** **पादोनाष्ट** वादनपर्यन्तं विद्यालये प्रार्थनासभा भवति।

(i) **सपादअष्ट** (8:15) वादनतः **नव** (9:00) वादनपर्यन्तं विज्ञानविषयस्य कालांशः भवति।
(ii) वयं **नव** (9:00) वादनतः **पादोनदश** (9:45 ) वादनपर्यन्तं गणितविषयं पठामः।
(iii) **पादोनत्रि** (2:45) वादनतः **सार्धत्रि** (3:30) वादनपर्यन्तं हिन्दीभाषाकालांशः भवति।
(iv) संस्कृतशिक्षकः **सपाददश** (10:15) वादने अध्यापयति।

4. अधोलिखितवाक्येषु समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत-
**उदाहरणम्**- छात्रः **पञ्च** (5:00) वादने उत्तिष्ठति **सपादषड्** (6:15) वादने व्यायामं करोति।
छात्रः **पञ्चवादने** उत्तिष्ठति **सपादषड्वादने** व्यायामं करोति।

(i) छात्रः **सार्धसप्त** (7:30) वादने प्रातराशं कृत्वा **पादोनदश** (9:45) वादने विद्यालयं गच्छति।
(ii) **चतुर्** (4:00) वादने गृहमागत्य **सार्धचतुर्** (4:30) वादमपर्यन्तं विश्रामं करोति।
(iii) **पञ्च** (5:00) वादने भोजनं कृत्वा **सार्धनव** (9:30) वादनपर्यन्तम् अध्ययनं करोति।
(iv) रात्रौ **पादोनदश** (9:45 ) वादनतः **पञ्च** (5:00) वादनपर्यन्तं शयनं करोति।

www.ncertsolutionhub.in